Title रसतरङ्गिणी

Author भानुदत्तः

Extent १२ Age

Subject अलंकारशास्त्रम् · अपूर्णम्

७७६

नं० ८८४-घ

रसतरंगिणी (अलंकारशास्त्रम्)

पत्राणि १२ (अपूर्णम्, जीर्णञ्च)

नं० ७७५-घ

कर्त्ता भानुदत्तः

रसतरंगिणी प-६

॥६०॥ ॐ स्वस्ति श्रीहेरंबाय नमः॥ ॥लक्ष्मीमालोक्य लुम्पन्निगममुपहसन्श्लोचयन्युक्तजं नूनं त्वं शोणाद्रिपत्रपन्
समिमिदन्मुखं वीक्ष्य लेभां चमंचन् हत्वा हैयंगवीनं चकितमपसरन्लोचनं त्सारकैर्दिगंतान् सिंचन्दंतेन भूमिं तिल
मिव तुलयन्यातु मां पीतवासाः १ भारत्याः शास्त्रकांतारश्रांतायाः शैत्यकारिणी क्रियते भानुना भूरि रसा रसतरं
गिणी २ बालीकमलिनी भानोरेषा रसतरंगिणी हंसाः कृतधियस्तत्र युक्तमत्र प्रतीयतां ३ गिरां देवि तरं
गिण्यां वारय क्रूरवारणान् यत्र विप्लुतिलोकानामाविलो विरलो रसः॥४॥ हेतोः सर्वं वर्तित्व नियमात्सर्वमेव
तस्योपन्यासः समुचितो रसस्य हेतवो भावादयस्तेन रसेभ्यः सर्वं भावादय एव निरूप्यन्ते रसानुकूलो विकारो^
भावः विकारोन्यथाभावः विकारश्च द्विविधः आंतरः शारीरश्च आंतरोपि द्विविधः स्थायिभावो व्यभिचारिभा
वश्चेति शारीरस्तु सात्विकः यत्तु मनोविकारो भावस्तथा च देहविकारे खेदादौ भावपदप्रयोगो गौण इति तन्न
तुल्यवदुभयत्र भावपदप्रयोगेण विनिगंतुमशक्यत्वात् लक्षणानुरोधेन लक्ष्या व्यवस्थितेः इतरभावस्यात्र

भावत्वोपनायकत्वे सति सजातीयविजातीयभावानभिभाव्यः प्रथमः परैरनभिभाव्यो वा मनोविकारिणस्यानु
त्प्रधानो मनोविकार इति वा स्थायीभावः न च व्यभिचारिणि सात्विकभावे वा व्यभिचारस्येतरभावस्यात्मभा
वत्वोपनायकत्वाभावात् चरमसमये विस्थायित्वादस्य स्थायित्वव्यपदेशः स चाष्टधा तत्र भरतः रतिर्हा
सश्च शोकश्च क्रोधोत्साहौ भयं तथा जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः तत्रेष्टवस्तुसमीहाज
नितामनोविकृतिरपरिपूर्णा रतिः सा च क्वचिद्दर्शनेन क्वचिच्छ्रवणेन क्वचित्स्मरणेन यथा चक्षुर्यस्य कु^
पीवलो निगदिते पीयूषपाथोधरोन्मूर्च्छसंज्ञा परिचारिका समजनि स्फीतं स्मितं दोहदं संतापं तरुणं कैक
केशारुचिं निःश्वासवाताहतिं कस्मादेष सहिष्यते सखि स च प्रेमद्रुमः कोमलः कोमलपदादष्टलता कु
तूहलकृतवचनवेषवैसादृश्यकृतो मनोविकारः परिमितो हासः वचनभेदवेषभेदकृताः ते भये क्रोधे बा^
नातिव्याप्तिः तत्र कुतूहलकृतत्वाभावात् यथा तातचरणैर्नो आगच्छन्नगरोपकण्ठविपिने रावेष्टितो

वालकैः शुद्धांतेपरिचारिकाभिरचितेसोल्लासमावेदितः साकूतं सकुतूहलं वलिवधूवृन्दे पुरोदापतत्सन्नं किंचिदुंचित^ ६१
स्मितलवः पायात्सवो वामनः लवपदादष्टर्णता इष्टविश्लेषजनितो रत्यनालिंगितः परिमितो मनोविकारः शोकः नचे
ष्टविश्लेषजनितविप्रलंभः शृंगारस्यकरुणरसत्वापत्तिः तस्य रत्यालिंगितत्वात् । नचरतिः प्रीतिस्तया विना शोकोपि
नोत्पद्यते इति तथा चासंभव इति वाच्यं इष्टसमीहाजनितमनोविकृते रतेरुक्तत्वात् । कुमारसंभवे रत्याः कादंब^
र्यां महाश्वेतायाः रघुकाव्येऽजप्रलापे करुण एव रसः तत्र तत्र वाधनिश्चया दिष्टवस्तुसमीहाया अभावात् य
त्र च मृते जीवितारण तत्र शृंगार एव रसः वाधसंदेहस्य ग्राह्य संदेहपर्यवसिततया समीहाया अप्रतिवंधकत्वात्
तथा च यूनोरेकस्मिन्मृते प्रलापः करुणरसः जीवितोर्विश्लिष्टयोः प्रलापः शृंगारः अत एव रसरत्नप्रदीपिका
यां करुणरसोदाहरणे अपि जीवितनाथ जीवसीत्यभिधायोत्थितया तया पुनः दहशे पुरुषाकृति क्षितौ हर २
कोपानलभस्म केवलं इति ननु विप्रलंभस्य पूर्वानुरागमानप्रवासकरुणात्मकत्वाज्जीवतोरपि विप्रलंभस्य
करुणरसत्वमिति चेत्सत्यं तत्र करुणरसस्यांगत्वेन भासमानत्वात्करुणात्मकत्वव्यपदेशः यथा· विरहज

रमूर्छया पतंती नयने नाम्बुजलेन सिच्यमानो समवेक्ष्य रतिं विनिःश्वसंती करुणाकुज्वलिता वभूव शंभोः कु
ज्वलिते सम्पूर्णता अवज्ञादिकृतः प्रमोदप्रतिकूलः परिमितो मनोविकारः क्रोधः प्रमोदप्रतिकूलेति विशेषण
दृशमुखदुर्वचनावमानितस्य रामस्य वीररसेनातिव्याप्तिः यथा परशुरामवाक्यं नाधारम्पकरोमि कामुकलता
विन्यस्तहस्तोबुजः किंचित्पाटलभासि लोचनयुगे तावन्निमेषोदयात् यावत्सायककोटिपाटितरिपुक्ष्मापा
लमौलिस्खलन्न्यक्षत्रीमाल्यपतत्सरागपटलै नर्मोदिता मेदिनी किंचित्पाटलत्वादसम्पूर्णता शौर्यदानदया
न्यतरकृतः परिमितो मनोविकार उत्साहः वीरस्तु युद्धवीर दयावीर दानवीर भेदात्त्रिधा युद्धवीरस्योत्साहो य
था सेनासंघट्टयन्द्युतिं द्विगुणयंश्चापश्चमत्कारयल्लेत्रस्वामिमुखो भविष्यति जगद्विद्रावणो रावणः इत्यु
त्साह विचारमुग्धहृदयो देवो रघूणांपतिर्ज्याविन्यासविधिं विनैव विशिखं बाणासने न्यस्तवान् अत्र विचारादसम्पूर्ण
ता दानवीरस्योत्साहो यथा आदर्शाय शशांकमंडलमिदं हर्म्योपहेमाचलं दीपाय द्युमणिं महीमिव कश्यपेनाभिद्द
वेदत्तवान् दित्साप्रहर्षितप्रमोदसलिलव्याकीर्णनेत्राम्बुजो जानीमो भृगुनन्दनस्तदखिलं न प्रायशो दृष्टवान्

पल्लवितो न तु फलित इत्यस्र्णता दयावीरस्योत्साहो यथा दुस्तारसंसारपयोधिपारप्रकारमालोचयतो जनानां समु-
त्थितो वक्षसि कैटभारेः स्तपञ्जरः कौस्तुभकैतवेन अङ्कुरोपन्यासादस्र्णता अपराधविकृत इव विकृतसत्वादि
जनितोऽपरिस्र्णो मनोविकारो भयं यथा तार्क्ष्यपक्षपवनोपसेवितं वीक्ष्य वीक्ष्य यदुनन्दनं पुनः भीतभीत इव तत्र
कालियो मन्दमन्दमुपसर्तुमुद्यतः इवोपन्यासादस्र्णता अहृद्यदर्शनस्पर्शनस्मरणजनिता मनोविकृतिरपरि-
स्र्णा जुगुप्सा यथा शार्दूलशावकचटच्चटपच्यमानः सारंगशृंगवत्तिमूर्च्छितिरामचंद्रः वासं चकार नवभारत-
या जुगुप्सां दुःखेषु दुःखमतिरेव न दुःखितानां न तथेति पद्यादस्र्णता चमत्कारदर्शनस्पर्शनस्मरणजनितो
परिस्र्णो मनोविकारो विस्मयः यथा युध्यन्तमर्जुनं वीक्ष्य केवा देवा न विस्मिताः न मे नेव जगोविंदो दृष्टः कर्णप-
राक्रमः न मे नेव क्वचिति पद्यादस्र्णता शृंगारादौ चमत्कारदर्शनाद्यत्र मनोविकृतिरंगतया भासते तत्र शृंगार एव
रसः प्राधान्येन यत्र भासते तत्राद्भुत एव रसः अंगतया यथा वैषम्यं शंकति पंकजात्सकट यस्यानंदनीरं दृशोः
स्वर्णालंकरणाद्यनल्पपुलकौ वैधर्म्यमंगश्रियः तस्यानूपुरपद्मरागसहस्रपादारविंदश्रियो भेदं सिंजितमे

ववक्लिकिकिमितः शिल्पं विधेर्वर्णयेतं प्राधान्ये यथा विनाशायं कोयं समुदयति सौरभ्यसुभगः किरंज्योत्स्नाधा॰
मधिधरणिधारापरिहृढः धनुर्धत्तेस्मारं तिरयति विहारं नतमसां निरातंकः पंकेरुहयुगलपंकेनदयति॥ ७॥
इतिश्रीरसतरंगिण्यां भानुदत्तविरचितायां स्थायिभावनिरूपणं नाम प्रथमोध्यायः॥ १॥ अथ विभावा निरूप्यं॰
ते विशेषेण भावयंत्युल्लासयंतीति ये रसांस्ते विभावाः ते च द्विविधाः आलंबनविभावा उद्दीपनविभावाश्चेति यमा
लंब्य रस उत्पद्यते स आलंबनविभावः यो रसं उद्दीपयति स उद्दीपनविभावः आलंबनविभावो यथा प्राणसप्र
तिमूर्तिः अल्पात्मा पुष्पलतिकायाः अधिदेवतं नयनयोर्मम या साकापि सासैव शृंगाररसोद्दीपनविभावः तत्र
भरतः ऋतुमाल्यालंकारैः प्रियजनगांधर्वकाव्यसेवाभिः उपवनगमनविहारैः शृंगाररसः समुद्भवति चंद्र
चंदनादय ऊहनीयाः यथा संध्याप्रोणांबरजवनिकाकामिनोः प्रेमनाद्यं नांदीभ्राम्यद्भ्रमररविरुतं मारिषः
कोपि कालः तारापुष्पांजलिमिव किरन्सूचयन्पुष्पकेतो नृत्यारंभं प्रविशति सुधादीधितिः सूत्रधारः अथ हा
स्यविभावाः तत्र भरतः विपरीतालंकारैर्विकृताचाराभिदानवेषैश्च विकृतैरर्थविशेषैर्हसतीति रसः स्मृतो

हासः अंगविकृत्यादयऊहनीयाः यथा केयूरंघर्घरयन्भ्रमयन्मौलिंविवर्त्तयन्बाहुं नेत्रांचलेचपलयन्नघटयतिमाया
शिशुच्छायां करुणरसस्यविभावाः तत्रभरतः इष्टजनस्यविनाशाच्छायाक्लेशाद्बंधनाद्व्यसनात् एतेरर्थविशे
षैःकरुणाख्योरसःसमुद्भवति बंधुदारिद्र्यादयऊहनीयाः यथा त्वांपश्यतोभुजगपाशनिबद्धदेहमद्याविमेय
दसवोनवहिःप्रयांति नेत्रेनिमीलयशिपक्षपातिनेवतावदास्संमदीयमपिलक्ष्मणमुक्तमेव अथरौद्रविभावाः
तत्रभरतः आयुधखड्गाभिभवाधिकृतच्छेदाद्विदारणाच्चैव संग्रामसंभवाद्योद्दम्भःसंजायतेरौद्रः वैरिदर्शन
निर्भर्त्सनादयऊहनीयाः यथा तन्वातीतितिमिरद्युतिंकृतवतीत्रस्तर्षिचक्रव्यथामेषाभार्गवतावकीविजयतेनिस्त्रिंशधा
रानिशा युधक्रुद्धविपक्षपत्तविदलत्कुंभीद्रकुंभस्थलभ्रश्यन्मौक्तिककैतवेनपरितस्ताराबलीवर्षति वीरस्यविभा
वाः तत्रभरतः उत्साहाध्यवसायादविषादित्वादविस्मयान्मोहात् विविधादर्थविशेषाद्वीररसोनामसंभवति।
विनयबलादयऊहनीयाः यथा लंकाधिपःसंयतिशंकनीयोजेमारिजंभाहतबाहुवीर्यैः इत्यालपंतंहनु ६
मंतमेषरामःस्मितेरुत्तरयांचकार दानवीरस्यविभावोयथा वसुधाविनयांवहंतिकेचिद्वचसाकेपिचरंतिचार

चर्य्यां अतिथौ समुपागते सपर्य्यां पुलकैः पल्लवयंति केपि संतः दयावीरस्य विभावो यथा कथमविरलजाग्रज्जाति-
भाजो निशायां तमसि दुरवगाहे प्राणिनो वीक्षणीयाः इति किंसु समुदंचद्दीपलेखाभिरामे द्युतिपुरः कौस्तुभं संवभा
र ननु स्वनिष्ठ उत्साहः कथमुद्दीपनविभावो भवतीति चेत्सत्यं उद्दीपनविभावो हि त्रायमानएवगमकः स स्वनिष्ठः ।
परनिष्ठो वेति न विशेषः अनुभावस्तु स्वनिष्ठ एव गमकः तस्यानुमापकत्वेन पक्षे हेतुत्वनियमादिति ननु दयावीरः
कथं करुण एव नांतर्भवति निरुपाधिपरदुःखप्रहरणेच्छा दया सा च करुणविभावेन संभवति इति चेन्न करुण।
स्य स्थायिभावस्य शोकः दयावीरस्य स्थायिभावभेदेन भेदात् ननु दयावीरे करुणप्रतीतेः का गतिरिति चेत्सत्यं करु
णया विना दयावीरस्याननुभावात् तत्र करुणाया अनुभावकत्वादिति भयानकस्य विभावाः तत्र भरतः विकृतरव
सत्वदर्शनसंग्रामारण्यशून्यगृहगमनात् गुरुनृपयोरपराधात्कृतकश्च भयानको ज्ञेयः धाटिकावंधुवंधनश्रवण।
श्मशानदर्शनाद्यरूहनीयाः यथा उद्यत्कांतिकगैरकेशरदलत्पाथोधरप्रस्खलद्विद्युद्दीधितिकांचनीकृतजग।
त्निःशेषभूमीधरः स्फूर्जत्कंवनिनाद भिन्नवसुधामार्गप्रविष्टद्विजप्रोढाग्रीर्वचनप्रहर्षितवलिर्व्यालोकि मायाहरिः

बीभत्सस्य विभावाः तत्र भरतः अनभिमतदर्शनेन च गंधरसस्पर्शदोषैश्च उद्वेजनैश्च बहुभिर्बीभत्सरसः समुद्भवति
अहृद्यवस्तुनोऽश्रवणस्मरणादय ऊहनीयाः यथा योधानामधरैरशोककुसुमैर्नेत्रैः सितैरंबुजैर्दंतैः कुंददलैः करैः स
रसिजैः संपाद्य पुष्पांजलिं सिंहिकर्णयुगं विधाय करिणां रक्तावसिक्तांगकैः भूतानां वहुभिः पुरः पुरभिदो न्यस्तं समार
भ्यते अद्भुतविभावाः तत्र भरतः यत्त्वातिशयार्थयुक्तं वाक्यं शिल्पं च कर्म रूपं च तत्संबद्धैरर्थैरसोऽद्भुतो नाम संभवति ।
मायेंद्रजालाद्यर्थलाभादय ऊहनीयाः यथा उद्दामोद्दाममाद्यत्स्तिमितदलनोद्गजाग्रत्प्रभावः सोऽयं देवो भवतु नरहरि
स्तारिताशेषविश्वः यस्य प्रोद्ढप्रतापोद्भटविकटसटाकोटिभिः पाटितानां मंत्राणामेष मोधराणां वहिरिव निरगुर्विद्युतां के
तवेन इंद्रजालं यथा व्योम्नि प्रांगणसीम्नि संध्याकिरणं विस्तार्य चेलांचलं ध्वांतैः कार्मणपांसुभिस्त्रिजगतां नेत्राणि ।
संमोहयन् ताराशौक्तिकमौक्तिकानि विहगश्रेणीरवच्छस्य नाजींजीकृत्य वहिः करोति वदनात्स्वच्छात्सुगो मायिकः ।
॥ ॥इति श्रीभानुदत्तविरचितायां रसतरंगिण्यां विभावनिरूपणं नाम द्वितीयस्तरंगः ॥ २ ॥ अथानुभावा निरू ५
प्यंते येरसाननुभावयंति अनुभावगोचरतां नयंतीति तेऽनुभावाः कटाक्षादयः करणत्वेनानुभावकता करणत्वं च फ

योगव्यवच्छेदेनसंबंधित्वं ननुरसेकथमनुभावकापेक्षेतिचेत्सत्यं स्थायिभावःपरिपुष्टोरसस्तस्यचांतरत्वात्स्थापकनाव
नाकथंज्ञानमित्यनुभावकस्यापेक्षणीयत्वात् ननुकटाक्षादयःकथमुद्दीपनविभावानभवंति दृष्टैःकटाक्षादौकामि
नोमनोविकारःपरिपुष्टोभवति अनुभवसिद्धत्वेनापह्नोतुमशक्यत्वात् किंच प्राचीनसंमतिरपि ईषद्वक्रितपक्ष्म
पंक्तिभिरनाकूतस्मितैर्वीक्षितैरेतैरेवननवाद्यसुंदरिकरक्रोडे जगद्वर्त्तते अंतःपांशुलहेमकेतकदलद्रोणीदुर
त्यात्प्रियोदोर्मूलस्यविभावनादिह पुनःक्रूरेकिमाकांक्षसीत्यादयइतिचेत्सत्यं कटाक्षादीनांकरणत्वेनानुभावक
त्वं विषयत्वेनोद्दीपनविभावत्वं तथाचात्मनिरसानुभवकरणत्वेननायिकांप्रतिकटाक्षादयोऽनुभावाः तएवद्रष्टु
र्दृष्टिगोचरीभूताःकामिनोमनोविकारयंतोविषयत्वेनोद्दीपनविभावाइति सचानुभवः कायिकमानसाहार्य्यसात्वि
कभेदाच्चतुर्धा. कायिकाभुजक्षेपादयः मानसाःप्रमोदादयः नाद्येचतुर्भुजत्वस्नानादयश्चाहार्य्याः सात्विकारोमां
चादयः शृंगारस्यानुभावाः तत्रभरतः नयनवदनप्रसादैःस्मितमधुरवचोधृतिप्रमोदैश्च विविधैरंगविकारैस्त
स्याभिनयःप्रयोक्तव्यः कटाक्षभुजक्षेपादयऊहनीयाः यथा मुक्ताहारस्तनकलशयोःकर्णयोःकर्णिकारंमौलौ
मालापरिभवभयादेवदूरेन्यवारि दृष्टोभीष्टेसमजनिपुनःसुभ्रुवोभूषणायप्रातर्वीतोत्तरलकमलद्रोहदक्षःकटाक्षः

हासस्यानुभावाः तत्रभरतः विकृताकारैर्वाक्यैरंगविकारैर्विरुद्धवेषैश्च हास्यंजनयेद्यस्मात्तस्माज्ज्ञेयोरसोहास्यः अ
स्याधरविवरणदशनदर्शननासाकपोलस्पंदहृष्टिव्याकोशाकुंचनादयऊहनीयाः यथा पत्रीकृत्यकपालमंडल
मिदंपीयूषभानोःकलांवर्त्तीकृत्यफणामणिंफणिपतेःसंपाद्यतस्यांशिखां सायंदीपविधिंवितन्वतिशिवेमंदंह
सत्यातयाकिंचित्कुंचदपांगभंगकुटिलादृष्टिःसमारोपिता करुणानुभावाः तत्रभरतः निश्वसितेनविरुदितै
र्मोहश्चितिपातदैवनिंदाभिः अभिनेयःकरुणरसोदेहाघातादिभिश्चैव मुखशोषप्रलापवैवर्ण्यादयऊहनीयाः
यथा तातेनिर्गच्छतिगगणपतौनाकमध्यापितस्यावाचांदेव्याःपतितशिथिलैकंकणैनैवदोष्णोः अद्याप्याज्ञ
भवतिकुचयोनापिपाटीरपंकोनेत्रेनिर्यत्ययस्मिन्पुनःकज्जलंस्थैर्यमेति रौद्रस्यानुभावाः तत्रभरतः ना
नाप्रहरणसंकुलशिरःप्रकंपैःकरागनिष्पेषैः घोरैरर्थविशेषैस्तस्याभिनयःप्रयोक्तव्यः भ्रूकुटीदंतोष्ठ
पीडनादयऊहनीयाः यथा येयेभीमेनबद्धभ्रूकुटिघनरवंदंतनिष्पीडितोष्ठंविक्षिप्ताव्योम्निविंध्याचल ६
चटुलचमत्कारभाजःकरीन्द्राः तेषा

॥श्रीगणपतये नमः॥ रसस्वरूपमाह। कारणान्यथ कार्याणि सहकारीणि यानि च। रत्यादेः स्थायिनो लोके तानि चे
न्नाट्यकाव्ययोः॥१॥ विभावा अनुभावास्तत्कथ्यन्ते व्यभिचारिणः। व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः॥२॥ का
रणानि प्रमदेन्दूद्यानादीनि कारकोद्दीपकरूपाणि। कार्याणि वाङ्मनोबुद्धिशरीरारंभरूपाणि च कटाक्षभुजक्षेपा
दीनि सहकारीणि तेषु जनयितव्येषु उत्कंठादीनि। विभावाः आलंबनोद्दीपनरूपाः। वासनारूपतयास्थितान् रत्या
दीन् स्थायिनो विभावयन्ति। रसास्वादांकुरयोग्यतां नयन्तीति विभावाः। अनुभावयन्ति च तानिति अनुभावाः। पोषकतया
विशेषेणाभितः काये स्थायिनं चारयन्ति। विशेषेणाभिमुख्येन चरन्तीति वा व्यभिचारिणः। तैर्व्यक्तः व्यक्तिं प्रापितो र
त्यादिः स्थायी रसः कथ्यत इत्यर्थः। उक्तं च भरतेन। विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति। अस्यार्थः।
स्थायिनां विभावेनोत्पाद्योत्पादकभावरूपात्। अनुभावेन गम्यगमकभावरूपात्। व्यभिचारिणा पोष्यपोषकभाव-
रूपात् संयोगात् संबंधात्। रसस्य निष्पत्तिः उत्पत्तिरभिव्यक्तिः पुष्टिश्चेत्यर्थः। तथाहि। ललनादिभिरालंबनविभावैः
स्थायी रत्यादिको जनितः। उद्यानादिभिरुद्दीपनविभावैरुद्दीपितः। अनुभावैः कटाक्षभुजक्षेपणादिभिः प्रतीति
योग्यः कृतः। व्यभिचारिभिरुत्कंठादिभिः परिपोषितः शृंगारादिरसत्वमापद्यत इति। रसभेदानाह। शृंगारहास्यक
रुणरौद्रवीरभयानकाः। बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः। निर्वेदस्थायिभावाख्यः शान्तोऽपि नवमो र

सः। तत्र मनोनुकूलेष्वर्थेषु सुखसंवेदनं रतिः। तत्प्रकृतिको रसः शृंगारः। स द्विधा। संभोगो विप्रलंभश्च। अनुकूलौ निषेवेते यत्रा-
न्योन्यं विलासिनौ। दर्शनस्पर्शनादीनि स संभोग उदाहृतः। २। भावो यदा रतिर्नाम प्रकर्षमधिगच्छति। नाधिगच्छति चाभी-
ष्टं विप्रलंभस्तदोच्यते। ३। अंगवक्रीडादिभिश्चेतोविकासो हास उच्यते। अंगं वैकृतं। तेन हासप्रकृतिको हास्यः। इष्टना-
शादिभिश्चेतो वैक्लव्यं शोकशब्दभाक्। शोकप्रकृतिकः करुणः। प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध उच्यते। क्रोधप्रकृति-
को रौद्रः। कार्यारंभेषु संरंभः स्थेयानुत्साह उच्यते। उत्साहप्रकृतिको वीरः। स च त्रिधा। युद्धवीरो दानवीरो दयावीरश्चेति। रौ-
द्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयं। भयप्रकृतिको भयानकः। जुगुप्सा गर्हणा निंदा दोषमाहात्म्यदर्शनात्। जुगुप्साप्रकृ-
तिको बीभत्सः। विस्मयश्चित्तविस्तारो वस्तुमाहात्म्यदर्शनात्। विस्मयप्रकृतिकोऽद्भुतः। निर्वेदश्चित्तवृत्तेस्तु विरामे विषयेष्व-
लं। निर्वेदप्रकृतिकः शांतः। स तु नाट्ये न प्रसिद्धः। काव्यादौ प्रसिद्ध एवेति दिक्। अथैषां स्थायिभावानाह। रतिर्हासश्च शो-
कश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः। एतल्लक्षणमाह। विरुद्धैरविरुद्धैर्वा यं तिरो-
धातुमक्षमाः। आनंदांकुरकंदोऽसौ भावः स्थायिपदास्पदम्। रसविरोधमाह। ज्ञेयौ शृंगारबीभत्सौ तथा वीरभयानकौ। रौ-
द्राद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः। व्यभिचारिभेदानाह। निर्वेदग्लानिशंकाख्यास्तथासूयामदश्रमाः। आलस्यं
चैव दैन्यं च चिंता मोहः स्मृतिर्धृतिः। व्रीडा चपलता हर्ष आवेगो जडता तथा। गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च। सुप्तं

॥काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कांतासम्मिततयोपदेशयुजे।१। शक्तिर्निपुणता
लोकशास्त्रकाव्याद्यवेक्षणात्। काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे।२। शक्तिः कवित्वबीजभूतो देवताप्रसादाद् दिज
न्मा संस्कारविशेषः प्रतिभाव्यपदेश्यः।२। तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि। इदमुत्तममतिशयिनि व्यं
ग्ये वाच्याद्ध्वनिर्बुधैः कथितः।३। इदं काव्ये वाच्यादतिशयिनि अधिकचमत्कारकारिणि व्यंग्ये उत्तमं काव्यं भवति। तद्
बुधैर्ध्वनिः कथित इत्यर्थः।३। अतादृशि गुणीभूतव्यंग्यं व्यंग्ये तु मध्यमं।४। शब्दचित्रं वाच्यचित्रमव्यंग्यं त्ववरं स्मृ
तं। वाच्यादतिशयितचमत्कारानाधायके व्यंग्ये मध्यमं काव्यं भवति। तद्गुणीभूतव्यंग्यमित्युच्यत इत्यर्थः। व्यंग्यहीनं
तु अधमं स्मृतं। तत् शब्दचित्रं वाच्यचित्रमिति द्विविधं चित्रकाव्यमुच्यत इत्यर्थः।४। स्याद्वाचको लाक्षणिकः शब्दो
त्र व्यंजकस्त्रिधा। वाच्यादयस्तदर्थाः स्युस्तात्पर्यार्थोऽपि केषुचित्।५। शब्दस्त्रिधा। वाचको लाक्षणिको व्यंजक इति। तद
र्थाः वाच्यलक्ष्यव्यंग्याः। क्रमेण तेषां वाचकादीनामर्थाः स्युः। तात्पर्यार्थोऽपि वाच्याद्यर्थविलक्षणः पारी रकुकेषुचिन्न्या
यादिषु न तु मीमांसादिष्वपीत्यर्थः।५। साक्षात्संकेतितं योऽर्थमभिधत्ते स वाचकः॥ गृहीतसंकेतं यमर्थमभिधत्ते प्रति
पादयतीत्यर्थः। तन्मूलो लाक्षणिकस्तत्र व्यापारो व्यंजनात्मकः। तन्मूः तस्या लक्षणाया आश्रयो लाक्षणिकः। तत्र लाक्ष

णिके शब्दे व्यापारो व्यंग्यप्रकाशनानुकूलो व्यंजक इत्यर्थः ।६। मानान्तरविरोधेन मुख्यार्थस्यापरिग्रहे । मुख्यार्थेनाविनाभू-
तेऽत्र वृत्तिर्लक्षणेष्यते । लक्षणा तावद् द्विधा । शुद्धा गौणी च । शुद्धापि द्विधा स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणं । उपा-
दानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ।१। स्वसिद्धये स्वार्थस्यान्वयप्रवेशसिद्धये पराक्षेपः परलक्षणे स्वार्थापरित्यागे-
न परार्थलक्षणमुपादानमित्यर्थः । एवं परार्थे स्वसमर्पणं परस्यान्वयप्रवेशसिद्ध्यर्थं स्वार्थसमर्पणं । स्वार्थपरि-
त्यागेन परार्थलक्षणं लक्षणलक्षणमित्यर्थः । एते एवान्यत्राऽजहत्स्वार्था जहत्स्वार्थेति प्रसिद्धे स्तः ।७। संयोगो विप्रयो-
गश्च साहचर्यं विरोधिता । अर्थः प्रकरणं लिंगं शब्दस्यान्यस्य सन्निधिः ।८। सामर्थ्यमौचिती देशः कालो व्यक्तिः स्व-
रादयः । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ।९। तत्र संयोगः प्रसिद्धार्थस्य गुणविशेषरूपः संबंधः तेनाभिधा
नियम्यते यथा । सशंखचक्रो हरिरित्यत्र शंखादिसंयोगेनानेकार्थस्य हरिशब्दस्याच्युतेऽभिधा नियम्यते । अन्यत्र
हरिपदार्थेन तत्संयोगाभावात् । विप्रयोगस्तादृशसंबंधध्वंसः । तेन यथा । अशंखचक्रो हरिरित्युच्यते । ध्वंसस्य प्रा- ८
तियोगिपूर्वकत्वात् । साहचर्यं सहचरता । तेन यथा । रामलक्ष्मणाविति । रामपदस्य लक्ष्मणसाहचर्येण दाशर-
थौ । विरोधः सहानवस्थानं वध्यघातकभावश्च । तेन यथा । छायातपाविति । कोत्पादोऽत्र कलेपि छायापदस्यात

तेन

पाभावे॰ रामार्जुनाविति। भार्गवकार्त्तवीर्ययोः। अर्थः प्रयोजनं यथा। स्थाणुं भज भवच्छिदे इत्यत्र भवच्छेदरू-
पप्रयोजनवशात् स्थाणुशब्दस्य भवे॰ प्रकरणं वक्तृश्रोतृबुद्धिस्थता। तेन यथा। सर्वं जानाति देव इत्यत्र देवशब्दस्य रा-
जनि। लिंगं संयोगातिरिक्तसंबंधेन परपदव्यावृत्तो धर्मः। तेन यथा। कुपितो मकरध्वज इत्यत्र मकराकारध्वजसमुद्रा-
भ्यां व्यावृत्तेन समवायसंबंधवता कोपेन मकरध्वजशब्दस्य कामे॰ शब्दस्यान्यस्य संनिधिः। नियतार्थैकशब्दान्तरसामाना-
नाधिकरण्यं। तेन यथा। देवस्य त्रिपुरारातेरित्यत्र त्रिपुरारातिशब्दसामानाधिकरण्यात् देवशब्दस्य शंभुरूपे ऽमरे। सा-
मर्थ्यं कारणत्वं तेन यथा। मधुना मत्तः कोकिल इत्यत्र मधुशब्दस्य वसंते॰ औचिती अर्हता। तया यथा। पातु वो दयिता-
मुखमित्यत्रोल्लंघितमनोरथसाधनौचित्येन मुखशब्दस्य सांमुख्ये। देशेन यथा। भात्यत्र परमेश्वर इत्यत्रात्रेति राज-
धानीरूपाद्देशात्परमेश्वरपदस्य राजनि। कालेन यथा। चित्रभानुर्विभातीत्यत्र चित्रभानुपदस्य दिवा दिवाकरे। नक्तम-
ग्नौ। व्यक्तिः पुंस्त्वादिलिंगं। तया यथा॰ मित्रं भातीति। अत्र नपुंसकरूपाल्लिंगान्मित्रपदस्य सुहृदि पुल्लिंगात्सूर्ये। स्वर-
स्तु श्रुतिगोचर उदात्तादिः तेन यथा॰ इंद्रशत्रो वर्द्धस्वेत्यत्र अंतोदात्तत्वे षष्ठीतत्पुरुषव्यक्त्या इंद्रस्य शातनकर्मत्वं लभ्य-
ते पूर्वपदांतोदात्तत्वे च। इंद्रः शातयिता यस्येति बहुव्रीहिलाभात् इंद्रस्य शातनकर्तृत्वं लभ्यते। काव्ये तु नैवं वाऽकृत्यं॥१९॥
अथ दोषानाह। दोषस्त्रिविधः। शब्ददोषोऽर्थदोषो रसदोषश्चेति। तत्र शब्ददोषानाह। दुष्टं पदं श्रुतिकटुच्युतसंस्कृत-

प्रयुक्तमसमर्थं।निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाश्लीलं।संदिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत्क्लिष्टं।।
अविमृष्टविधेयांशं विरुद्धमतिकृत्समासगतमेव। दुष्टं पदमिति।प्रत्येकं संबध्यते।श्रुतिकटु यथा।कार्त्तार्थ्यं मा
पन्नपतिः कृतस्मरतनुः।अत्र कार्त्तार्थ्यपदं परुषवर्णप्रायं।दोषश्चात्र श्रोतुरुद्वेगजनकत्वं।च्युतसंस्कृति।च्युतासं
स्कृतिर्व्याकरणलक्षणाननुगमो यत्र तत्।यथा।सारंगो नु निनाथते।अत्र नाथनदतियाचत इत्यर्थे च्युतसंस्कृति।सा
मान्यतः प्राप्तस्यात्मनेपदस्य नियामकेनाशिषि नाथ इति सूत्रेणानाशिषि तन्निषेधात्।अत्रार्थप्रतीतिर्दोषः।अप्र
युक्तं।अनुशासनसिद्धमपि कविभिर्न प्रयुक्तं यथा।त्वं गुरुर्दैवतं पिता।अत्र दैवतानि पुंसि वेत्याम्नातोऽपि पुंल्लिंगो
दैवतशब्दः कविभिर्न क्वापि प्रयुक्तः।मुख्यार्थोपस्थितिविलंब एव दोषः।असमर्थं।यथा।हंति भागीरथीमपः।अ
त्र हन्धातोः पद्यस्यादिशब्देषु पदादिपदोपसंदानेन मार्गाद्यर्थोपसंदानेन वा गतौ सामर्थ्येन पुनः [illegible]श्लिष्टस्य अतो रवि
र्थानुपस्थितिर्दोषः।निहतार्थं निहतः प्रसिद्धेनार्थेनाप्रसिद्धतया व्यवहितो विवक्षितोऽर्थो यस्य तत्।यथा।पादाहति।
शोणितं वदतः।अत्र शोणितपदस्य रुधिरे प्रसिद्धिरप्रसिद्धिश्च रंजितत्वरूपे विवक्षितार्थे।अतोऽनाकृष्टप्रसिद्धस्येवोपस्थि ९
त्या विवक्षितस्य विलंबेनोपस्थितिर्दोषः।अनुचितार्थं।अनुचितो विवक्षितार्थतिरस्कारकोऽर्थो यस्य तत्।यथा।रणाध्व
मेधे पशुतां गतो नृपः।अत्र शोऽर्थ्यप्रतिपाद्यपशुपदं कातरतामभिव्यनक्ति।तदर्थे तस्यादर्शनात्।अतो विवक्षिततिर

स्कारकार्योपस्थितिर्दोषः। निरर्थकं। अविवक्षितार्थकं। वृत्तनिर्वाहमात्रप्रयोजनकमिति यावत्। यथा। पादारविंदं तव हि
प्रपन्नः। अत्र हि पदं निरर्थकं। तदर्थस्याविवक्षितत्वात्। अतः प्रयोजनानुसंधानव्यग्रता दोषः। अवाचकं। विवक्षि-
तधर्मविशिष्टस्य विवक्षितधर्मिणः क्वापि न वाचकं यत्तदित्यर्थः। यथा। जलधरशायी हरिर्जयति। अत्र जलधरशब्द-
स्य जलाधारकत्वप्रकारेण सामर्थ्येपि न समुद्रे धर्मिणि सामर्थ्यं। यद्यपि योगशक्तिस्तत्राप्यस्त्येव तथापि रूढ्या तति-
रोधानास्ति कल्पैव। अत्र विवक्षितार्थानुपस्थितिर्दोषः। अतोऽसमर्थाद्भेदः। त्रिधाश्लीलं। व्रीडा जुगुप्साऽमंगलव्य-
क्तिहेतुकं त्रिप्रकारकमित्यर्थः। यथा। शिवलिंगं हृदि स्मर। वायुसाददती शनैरभिमुखं पततुः स्थिता केवलं। कालस्त-
के शापाशोयं। अत्र मेढ्रगुदशवसुमन्तुभिर्व्रीडादित्रयहेतुकं त्रिविधमश्लीलं द्रष्टव्यं। अत एव रसापकर्षकार्योप-
स्थितिर्दोषः। संदिग्धं। विवक्षिताविवक्षितोभयार्थोपस्थापनानुकूलत्वरूपद्व्यसंदेहविषयः। यथा। समागमिष्याम्युदि-
ते विधोऽहं। अत्र विधुविधिशब्दयोः संदेहः। अत उद्देश्यनिश्चयाभावो दोषः। अप्रतीतं। एकशास्त्रानुशासनातिरिक्तशा-
स्त्रमात्रप्रसिद्धं। यथा। ज्ञानाद्विगलिताशयः। अत्राशयपदं योगिप्रयोज्यानजन्यवासनार्थः। स च योगशास्त्र एव प्र-
सिद्धः। अतस्तच्छास्त्रानभिज्ञस्यार्थानुपस्थितिर्दोषः। ग्राम्यं। केवलं लोके प्रसिद्धं न तु शास्त्रेपि। यथा। कटिस्तव

रतेमनः। अतः कटिशब्देन लोकानभिज्ञत्वं प्रति तदर्थानुपस्थितिर्दोषः। नेयार्थो। नेयोऽर्थो यस्मात्तत्। नेयत्वं च लक्षणायाश्च
विषयत्वात्। यथा· वक्त्रेंतेन तु ते चकोरनयने चंद्रं चपेटातिथिं। अत्र चपेटापदं निर्जितत्वे प्रयुक्तं न चात्र लक्षणा मुख्य
शब्दार्थोतिरेकिणोऽर्थस्य प्रतीतिः। अतो हेत्वभावेनार्थानुपस्थितिर्दोषः। क्लिष्टं। क्लिष्टादित्रयं समासगतमेवेत्यभि
संबंधः। तत्र क्लिष्टं अर्थप्रतीतो क्लेशवत्· यथा· अत्रिनेत्रोद्भवज्योतिरुदयोज्ज्ञासिमत्सरः। अत्र सामान्यतोऽन्वयबोधा
विलंबेति। चंद्रप्रकाशोदयव्याकोशैः किंतु कुमुदेषु केसर इत्यस्यार्थस्य न झगुपस्थितिः। अतोर्थप्रतीतिविलंबो दो
षः। अविमृष्टविधेयांशं। अविमृष्टः प्राधान्येनानिर्दिष्टो विधेयांशो यत्र तत्। प्राधान्यं च प्रतीतियोग्यता। सा चानु
पसर्जनीभूतत्वे सति उद्देश्यानंतर्यं। यथा· वंशः शुचिः कांतवपुर्विवेकिनी बुद्धिः प्रभूतं वसु पुण्यकर्मणां। अत्र
फलोद्देशप्रकारे वपुषि चारुत्वं विधित्सितं तच्च समासे न्यग्भूतं· अतो विवक्षितार्थाप्रत्ययो दोषः। विरुद्धमतिकृ
त्। पदांतरसन्निधानेन प्रकृतप्रतीतिन्यक्कारप्रतीतिजनकं। यथा· अकार्यमित्रं समभवान्ममासि। अत्र कार्यमं १०
तरेण मित्रमिति विवक्षितं। अकार्ये मित्रमिति तु प्रतीयते। अतो विवक्षितार्थतिरस्कारकार्थोपस्थितिर्दोषः। अपा
स्तच्युतसंस्कारमसमर्थं निरर्थकं। वाक्येपि दोषाः संत्येते पदस्यांशेपि केचन॥ २॥

।अथार्थदोषाः। अत्रार्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुःक्रमग्राम्याः। संदिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च। अनवीकृ
तः सनियमानियमविशेषाविशेषपरिवृत्ताः साकांक्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः। विध्यनुवादायु-
क्तस्त्यक्तपुनःस्वीकृतोऽश्लीलः। अदुष्ट इति सर्वत्र संबध्यते। पुष्टत्वं च विवक्षितार्थबाधप्रयोजकानुपादानत्वं तद्भिन्न
त्वमपुष्टत्वं। यथा- गगने वरुविस्तृते। अत्र वरुविस्तृतत्वं गगनपदादेव लभ्यमतो त्रग्णो नुरुं वैमुख्यं दोषः। कष्टः। प्रतीतिक्लेश
वान्। यथा- धीराणां निम्नतोयेषां मुखाद्यक्तिमुपेयुषी। तयैवमन्येते द्विजिराख्यया व्यपदिश्यते। अत्र सरस्वती नदी एव क
विमुखे वा कूरूपाद्व्यपत इति तन्नाम्नैव व्यवक्रियत इत्युल्लेखितं। अयमर्थः क्लेशेन प्रतीयते। अतः सम्यक्प्रतीतिविरहो कृ
दोषः। व्याहतः। उपलक्षितविरुद्धः यथा- संत्येवान्येपि चंद्रा ग्रामानसोन्मादकारिणः। कंचिच्चंद्रममुं दृष्ट्वा कोप्यानंदोनुभू
यते। अत्र वाक्यार्थाप्रतीतिर्दोषः। पुनरुक्तः। शाब्देन प्रतिपन्नत्वे सति पुनस्तेनैव प्रतिपादितः यथा- तिष्ठत्र संभ्रमेण
लंकोवका शोभयस्व ते। अत्र वाक्यद्वयमभिन्नार्थं। निःप्रयोजनाभिधानेन श्रोतुर्वैमुख्यं दोषः। दुःक्रमः। विरुद्धक्रमः। य
था- विश्राणय तुरंगं मे मातंगं वा महीपते। अत्र सहृदयोद्वेगो दोषः। ग्राम्यः। अविदग्धोक्तिप्रतिपादितः यथा- अभिल
षामि रतेरहसि त्वया त्वरितमूरुमुदंचय कुंचितं। अत्राश्लीलवद्दोषः। संदिग्धः संदेहविषयः। यथा-। नितंबाः किं मही

प्राणाः सेव्याः किं वा मृगीदृशः। उद्देश्यप्रतिनिर्देश्यविरहो दोषः। यत्र तु संदेह एवोद्देश्यस्तत्रादोषत्वमेवेति। निर्हेतुः। निष्क्रांतो हेतुर्य-
स्मात्। यथा· शोणेनात्मजशोकतः परिहृतं तांबूलमुंचाम्यहं। अत्र त्वशोकत्यागे हेतुर्नोपात्तः अतउद्देश्यप्रतीतिविरहो दोषः
प्रसिद्धिविरुद्धः। लोकशास्त्रयोर्यत्रार्थेन प्रसिद्धिः। यथा। घोरटंकटकैर्मन्ये कामचक्रं करे तव। अत्र कामस्य चक्रं क्वापि न प्र-
सिद्धं। विरोधाद्दर्थाप्रतीतिर्दोषः। विद्याविरुद्धः। शास्त्रेण विरोधवान्। यथा· सदा स्नात्वा निशीथिन्यां नित्यकर्मकरोत्य-
सौ। अत्रोपरागादिकं विना रात्रिस्नानं निषिद्धमिति अभिमतप्रतीतिविरहो दोषः। अनवीकृतः। भंग्यंतरेणापन्नवत्वं
तन्न प्रापित इत्यर्थः। यथा· प्राप्तं राज्यं ततः किं युधि चरणमरेर्मूर्ध्नि दत्तः ततः किं· भुक्ता भोगास्ततः किं शतमथ शरदां
दीर्घमायुस्ततः किमित्यादि॥ अत्र सर्वेष्वर्थेषु ततः किमित्येकैव भंगिः। नवीकृतं तु। यदि दहत्यनिलोऽत्र किमद्भुतं यदि
च गौरवमद्रिषु किं ततः इत्यादि। सनियमपरिवृत्तः। सनियमत्वेन वक्तुमुचितोऽनियमत्वेनोक्तः। यथा। याताः प्राणभृ-
तां मनोरथगतीरुल्लंघ्य यत्संपदस्तस्याभासमणीकृताश्मसु मणेरश्मत्वमेवोचितं। अत्राभासमात्रेण मणीकृ- ११
तेष्विति वाच्यं गुणांतरव्यावर्तनेन निंदातिशयप्रतीतेः। अनियमे तु न निंदनीयानां गुणांतरव्यवच्छेदप्रत्ययः अतो
ऽप्युत्पस्तु. नयनेन वैमुख्याध्यायकत्वे दोषः। अनियमपरिवृत्तः पूर्वस्माद्विपरीतः। यथा· वाहिन्यः पार्श्वगा राजन्स

मुग्धो दक्षिणः करः । अधरः शोण एवायं कंपमंबुनि ते स्फुहा । अत्र शोण एवेति नियमो न वाच्यः वैयर्थ्यात् अधिकपदमे
दो दोषः । विशेषपरिवृत्तो यथा । चंद्रं चूर्णितौ यह्नस्सतो न यनिश्चणे निर्भर्त्स्यैतान्यिकानित्यादि । अत्र ज्योत्स्नीमिति रात्रि॰
विशेषो वाच्यः । आकांक्षाविरहो दोषः । सामान्यपरिवृत्तो यथा · । दृषत्सुहारे रत्नानि मावमंस्था नदीपते । कौस्तुभस्य प्र
दानेन त्वया यत्तोषितो हरिः । अत्र कौस्तुभस्येति विशेषतो रत्नवचनं नोचितं । विवक्षितानिर्वाहो दोषः । साकांक्षः इ
तरपदार्थान्वयाय विशेषणसाकांक्षः यथा · रामोहं तादृशमुखस्त्रीरत्नं मृष्यते कथं । अत्र स्त्रीरत्नमिति तस्यार्थेउ
पेक्षितुमित्यस्यार्थमाकांक्षति । अभिधानापर्यवसाने दोषः । अपदयुक्तः । अपदेऽस्थाने युक्तः यथा · जन्म ब्रह्मकुले
भक्तिः शिवे सर्वसमृद्धता । नेदृक्कुमारावणीयं न चेत्सर्वे गुणाः क्व नु । अत्र जगदाकंददायितादि नारायणस्पृहेयत्वं॰
विवक्षितं । तथा चरावणो न चेदित्यत्र सर्वे गुणाः क्व नु इति योजितं समाधाने पर्यवस्यतीति दुष्टं अतो विरुद्धार्थप्रतीति
दोषः । सहचरभिन्नः । सजातीयवियुक्तः यथा · श्रुतेन बुद्धिर्व्यसनेन मूर्खता अत्र श्रुतिबुद्ध्योर्व्यसनमूर्खतयोश्च वि
जातीयत्वं उभयोरुपादेयत्वेऽनुपादेयत्वेवा प्रतीतिर्दोषः । प्रकाशितविरुद्धः । प्रकाशितो विवक्षितार्थस्य विरुद्धोऽर्थो ये
न वाक्यार्थेन सः यथा · लग्नं यया रिकंठे वसियष्ट्या रक्तया तदासक्तः । विदितं तेऽस्त्विति गादितुं यत्कीर्तिः श्री गिरागताब्धि॰

मिवा॥१॥ अत्र विदितं तेऽस्त्विति वाक्यस्यार्थो लक्ष्मीस्ततोऽपसरतीति विरुद्धं प्रकाशयति। दोषः पूर्ववत्। विध्ययुक्तः। अयुक्तवि-
धिरित्यर्थः। यथा। प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशामकेशवमपांडवं भुवनमद्य निःसोमकमित्यादि अत्र शयित-
त्वं प्रयत्नेन बोध्यस इति विधिर्युक्तो न तु शेष इति शयनस्य। अतो विवक्षितानिर्वाहो दोषः। अनुवादायुक्तः। अयुक्तोऽनुवा-
दः यथा। रे चंद्र विरहिप्राणदमन क्वांबुजेक्षणे। अत्र प्राणदमने स्त्वनुवादः। क्वांबुजेक्षणेति विधिविरुद्धः। दोषः पूर्वव-
त्। त्यक्तपुनःस्वीकृतः। पूर्वं त्यक्तोऽनंतरं पुनःस्वीकृतः यथा। स्वजन्मायागुणानेतमंजन्विह्नुं सनातनं। मोक्षसेवक्षिप्स-
संते संगतिं विदधत्सतां। अत्र वृक्षिप्ससंतत इत्युपसंहृतो हितोपदेशश्चतुर्थचरणे न पुनरुपात्तः। अतोऽप्रयोजकत्वं दो-
षः। अश्लीलो व्रीडादिसमर्पकोऽर्थः यथा। उद्यतस्य परं हंतुं स्तब्धस्य विवरैषिणः। यथास्य जायते पातो न तथा पुनरु-
न्नतिः अत्र शब्दांतरेणाप्युपादीयमानोऽयमर्थः पुंव्यंजनादिसाधारण्येन प्रतीते व्रीडादायी। सुहृदयोद्वेगो दोषः॥ इ १२
तिपददोषाः अर्थदोषाश्च॥